लक्ष्यं विद्यमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2019

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

## SANACOR03T-SANSKRIT (CC3)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतं कस्यचिदेकस्य प्रश्नस्योत्तरं प्रदेयम्। 10×1 = 10

(क) महाकविवाणभट्टेन विरचितायां कादम्बर्य्यां शुकनासोपदेशम् अनुसृत्य लक्ष्म्याः चरित्रं निरूप्यताम्।

(ख) "वाणोच्छिष्टं जगत् सर्वम्"— वचनस्यास्य तात्पर्य्यं शुकनासोपदेशमाधारीकृत्य निरूपयत।

2. अधोलिखितेषु यथेच्छं त्रयं संस्कृतभाषया देवनागरीलिप्या च व्याख्येयम्। 5×3 = 15

(क) गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्वाविनयानामेकैकमप्येषामायतनम्, किमुत समवायः।

(ख) गङ्गेव वसुजनन्यपि तरङ्गवुद्बुदचञ्चला। दिवसकरगतिरिव प्रकटितविविधसंक्रान्तिः। पातालगुहेव तमोबहुला। हिडिम्बेव भीमसाहसैकहार्यहृदया। प्रावृडिवाचिरद्युतिकारिणी। दुष्टपिशाचीव दर्शितानेकपुरुषोच्छ्राया स्वल्पसत्त्वमुन्मत्तीकरोति।

(ग) इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका।

(घ) सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति जनम्, गुणवन्तमपवित्रमिव न स्पृशति, उदारसत्त्वममङ्गलमिव न बहु मन्यते, सुजनमनिमित्तमिव न पश्यति, अभिजातमहिमिव लङ्घयति, शूरं कण्टकमिव परिहरति।

(ङ) मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्, नाभिवादयन्त्यभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्।

अथवा

अधोलिखितेषु विषयेषु यथेच्छं त्रयमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×3 = 15

(क) गन्धर्वनगरलेखा, (ख) व्यसनम्, (ग) लक्ष्मीमदः, (ङ) मृगतृष्णिका,

(च) दर्पदाहज्वरोष्मा।

## SECTION-B

3. अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योत्तरं प्रदेयम्। 10×1 = 10

(क) विहारभद्रः कः आसीत् ? अनन्तवर्माणं प्रति तस्योपदेशाः आलोचनीयाः।

(ख) ''दण्डिनः पदलालित्यम्'' इति विद्वद्वचनतात्पर्य्यं वैशद्येन विवृणुत।

4. यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः – 2×5 = 10

(क) विश्रुतचरितस्य मूलग्रन्थः कः ? ग्रन्थकारस्य नाम किम् ?

(ख) ''अधीष्व तावद्दण्डनीतिम्''– केन कमुद्दिश्य इदमुक्तम् ?

(ग) के तावत् षड्गुणाः ?

(घ) कति राजविद्याः ?

(ङ) ''हस्तप्रसारयन्नेवोत्तिष्ठति'' – केन कदा किमर्थं हस्तप्रसारणं कृतम् ?

(च) के तावद्राजानः रिपुषट्कं जेतुमसमर्थाः आसन् ?

(छ) ''राज्यं नाम शक्तित्रयायत्तम्''– केन एवं विचिन्तितम् ? शक्तित्रयञ्च किम् ?

## SECTION-C

5. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×1 = 5

(क) सुबन्धुः, (ख) शुकसप्ततिः, (ग) पञ्चतन्त्रम्।

——×——